॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय २६

अभिषिक्ते तु सुग्रीवे प्रविष्टे वानरे गुहाम् ।
आजगाम सह भ्रात्रा रामः प्रस्रवणं गिरिम् ॥१॥

शार्दूलमृगसङ्घुष्टं सिंहैर्भीमरवैर्वृतम् ।
नानागुल्मलतागूढं बहुपादपसङ्कुलम् ॥२॥

ऋक्षवानरगोपुच्छैर्मार्जारैश्च निषेवितम् ।
मेघराशिनिभं शैलं नित्यं शुचिजलाश्रयम् ॥३॥

तस्य शैलस्य शिखरे महतीमायतां गुहाम् ।
प्रत्यगृह्णत वासार्थं रामः सौमित्रिणा सह ॥४॥

अवसत्तत्र धर्मात्मा राघवः सहलक्ष्मणः ।
बहुदृश्यदरीकुञ्जे तस्मिन्प्रस्रवणे गिरौ ॥५॥

सुसुखेऽपि बहुद्रव्ये तस्मिन्हि धरणीधरे ।
वसतस्तस्य रामस्य रतिरल्पापि नाभवत् ।
हृतां हि भार्यां स्मरतः प्राणेभ्योऽपि गरीयसीम् ॥६॥

उदयाभ्युदितं दृष्ट्वा शशाङ्कं च विशेषतः ।
आविवेश न तं निद्रा निशासु शयनं गतम् ॥७॥

तत्समुत्थेन शोकेन बाष्पोपहतचेतसं ।
तं शोचमानं काकुत्स्थं नित्यं शोकपरायणम् ।
तुल्यदुःखोऽब्रवीद्भ्राता लक्ष्मणोऽनुनयन्वचः ॥८॥

अलं वीर व्यथां गत्वा न त्वं शोचितुमर्हसि ।
शोचतो ह्यवसीदन्ति सर्वार्था विदितं हि ते ॥९॥

भवान्क्रियापरो लोके भवान्देवपरायणः ।
आस्तिको धर्मशीलश्च व्यवसायी च राघव ॥१०॥

न ह्यव्यवसितः शत्रुं राक्षसं तं विशेषतः ।
समर्थस्त्वं रणे हन्तुं विक्रमैर्जिह्मकारिणम् ॥११॥

समुन्मूलय शोकं त्वं व्यवसायं स्थिरं कुरु ।
ततः सपरिवारं तं निर्मूलं कुरु राक्षसं ॥१२॥

पृथिवीमपि काकुत्स्थ ससागरवनाचलाम् ।
परिवर्तयितुं शक्तः किमङ्ग पुन रावणम् ॥१३॥

अहं तु खलु ते वीर्यं प्रसुप्तं प्रतिबोधये ।
दीप्तैराहुतिभिः काले भस्मच्छन्नमिवानलम् ॥१४॥

लक्ष्मणस्य तु तद्वाक्यं प्रतिपूज्य हितं शुभम् ।
राघवः सुहृदं स्निग्धमिदं वचनमब्रवीत् ॥१५॥

वाच्यं यदनुरक्तेन स्निग्धेन च हितेन च ।
सत्यविक्रम युक्तेन तदुक्तं लक्ष्मण त्वया ॥१६॥

एष शोकः परित्यक्तः सर्वकार्यावसादकः ।
विक्रमेष्वप्रतिहतं तेजः प्रोत्साहयाम्यहम् ॥१७॥

शरत्कालं प्रतीक्षेऽहमियं प्रावृडुपस्थिता ।
ततः सराष्ट्रं सगणं राक्षसं तं निहन्म्यहम् ॥१८॥

तस्य तद्वचनं श्रुत्वा हृष्टो रामस्य लक्ष्मणः ।
पुनरेवाब्रवीद्वाक्यं सौमित्रिर्मित्रनन्दनः ॥१९॥

एतत्ते सदृशं वाक्यमुक्तं शत्रुनिबर्हण ।
इदानीमसि काकुत्स्थ प्रकृतिं स्वामुपागतः ॥२०॥

विज्ञाय ह्यात्मनो वीर्यं तथ्यं भवितुमर्हसि ।
एतत्सदृशमुक्तं ते श्रुतस्याभिजनस्य च ॥२१॥

तस्मात्पुरुषशार्दूल चिन्तयञ्शत्रुनिग्रहम् ।
वर्षारात्रमनुप्राप्तमतिक्रामय राघव ॥२२॥

नियम्य कोपं प्रतिपाल्यतां शरत्
क्षमस्व मासांश्चतुरो मया सह ।
वसाचलेऽस्मिन्मृगराजसेविते
संवर्धयञ्शत्रुवधे समुद्यतः ॥२३॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com